# विवेकभास्करः

## संस्कृतविभागीयभित्तिपत्रिका

रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोधसंस्थानम्, बेलुड़मठः


उद्घाटकः - स्वामी शिवपूर्णानन्दः

निर्देशकः - ड. श्रीवेङ्कटरमणभट्टः, सहायकप्राध्यापकः संस्कृतविभागीयः

सम्पादकः - कृष्णपद-रुइदासः, आचार्यद्वितीयवर्षीयः व्याकरणच्छात्रः

आलङ्कारिकः - श्रीसोमनाथवर्मनः, स्नातकद्वितीयवर्षीयः छात्रः।



वर्षम् - ०५,  विषयः - वाग्मी हनुमान्

प्रकाशनदिनाङ्कः -२०/४/१८, वासरः - शनिवासरः

# सूचीपत्रम्


॥सम्पादकीयम्॥........................................................................................3

॥हनुमत्पञ्चकम्॥......................................................................................4

॥हनुमज्जन्मवृत्तान्तः॥..................................................................................5

॥हनुमान्चालीसा इत्यस्य संस्कृतार्थः॥.............................................................7

॥हनुमतोक्तानि चितानि सुभाषितानि॥..........................................................10

# सम्पादकीयम्

विद्यन्ते मानवस्य बहूनीष्टसाधनोपकरणानि। मुख्यं तत्र आत्मगतं करणत्रयम् - शरीरं, वाक्, मनश्चेति। वाक् तत्र अन्यतमम् अत्युपयुक्तं साधनम्। भगवता भाष्यकारेणापि अभाणि - “एकः शब्दः सम्यग्ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके कामधुग्भवति”। अतः श्रेयस्कामैः वाक् अनवरतमनुसन्धेया। यथोचितवक्तृणाम् अत्युत्तमनिदर्शनत्वेन आञ्जनेयं मारुतिम् उपस्थापयामास आदिकविः। सीतान्वेषणार्थं गतः पवमानतनयः अशोकवनिकायां तां ददर्श। अवलोक्य तां प्राज्ञः स आत्मन्येवानेकशः तर्कयामास। सीताभिभाषणं कर्तव्यम् उत न, वाक् चेत् प्रयोक्तव्या संस्कृतेन उत मानुषगिरा इत्येवमादयः मारुतिः बहुधा वैचक्षण्येन विचारयामास। वाग्व्यवहारमेवान्ते व्यवस्य – “राजा दशरथो नाम...” इति सीताश्रवणसुखं सुखदं वाक्यमकथयत्। अतः प्रत्ययोत्पादकेन रामान्वयस्तोत्रेण वागारब्धा धीमता। इत्थं हि सर्वत्र स महामतिः यथाप्रसङ्गं यथोद्देशं निष्कृष्टं वचः प्रयुयुजे।

आञ्जनेयस्य वचोभङ्ग्या प्रभूतं प्रभावितो भगवान् पुरुषोत्तमः रामचन्द्रः मुक्तमनसा तद्वचसां प्रशंसां चकार -

नानृग्वेदविनीतस्य नायजुर्वेदधारिणः।  
नासामवेदविदुषः शक्यमेवं प्रभाषितुम्॥  
नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम्।  
बहु व्याहरताऽनेन न किञ्चिदपशब्दितम्॥(वा.रा. ४.३.२८-२९)

एवं हि न केवलं चतुर्षु वेदेषु अपि च षट्सु वेदाङ्गेषु कृतभूरिपरिश्रमं, स्ववचोवैदुष्येण रामायणस्य श्रुतिमाधुर्यापादकं, वैयाकरणानां गुरुकल्पम् अमुं मारुतिं स्वीकृत्य वयं भित्तिपत्रिकानिर्माणाय यतामहे। इयं प्रचेष्टा भवतां सुधियां मन आकृष्यत एव इत्यस्माकं पत्रिकालेखकानां विश्वासः इति शम्।

सम्पादकः।

# ॥ हनुमत्पञ्चकम् ॥

श्रीशुभदीपदासः, स्नातकतृतीयवर्षीयः।

मित्रं प्रचण्डं रघुनाथमित्रो
विचिन्त्य संपक्वफलं बुभुक्षुः।
उपारुणं बाहुबलो गतो य-
स्तस्मै नमो मारुतनन्दनाय॥१॥

अशान्तसिन्धोः सलिलं विशाल-
मुल्लङ्घितं येन सलीलमेतुं
सीताकलङ्कां च सुवर्णलङ्कां
तस्मै नमो मारुतनन्दनाय॥२॥

रणे च बाणाहतलक्ष्मणाय
यः पारगो भेषजसंग्रहेपि
हस्तेन नेता सुविशालशैलं
तस्मै नमो मारुतनन्दनाय॥३॥

प्रसार्य मार्गे निजदीर्घपुच्छं
मध्येवनं वानरवेषधारी
योनाशयत् पाण्डवदर्पवृक्षं
तस्मै नमो मारुतनन्दनाय॥४॥

दुःखप्रदातापि सुखप्रदायी
प्रकाण्डदेहोपि च सूक्ष्मदेही
कपीशभक्तेशरमेशनाथः
नरेशभक्तः खलु वानरेशः॥५॥

□□□□□□□

# ॥ हनुमज्जन्मवृत्तान्तः ॥

**श्रीमनमयमान्ना, स्नातकोत्तरद्वितीयवर्षीयः।**

कपीन्द्रः, महाबलः, हरिश्रेष्ठः, भक्तेषु अन्यतमः हनुमान् आदिकाव्यस्य रामायणस्य मुख्यमेकं चरित्रम्। ऐतिहासिकानां साधारणजनानाञ्च विस्मयस्य कारणभूतः अयम्।

न केवलं वयमेव विस्मिताः अपि तु स्वयं मर्यादापुरुषोत्तमः श्रीरामचन्द्रः विस्मितः सन् अगस्तमुनिं पृष्टवान् आदिकाव्ये यत् -

एतन्मे भगवन्सर्वं हनूमति महामुने।
विस्तरेण यथातत्त्वं कथयामरपूजित॥(उ.का.३५.१३)

भारतवर्षस्य दक्षिणदिशि यत्र सन्ध्यायां विश्वेदेवाः मरुद्गणश्च सुर्यस्य उपासनं कुर्वन्ति स्म तस्य सुमेरुप्रदेशस्य राजा आसीत् वानरप्रमुखः केशरीति। अञ्जना तस्यैव पत्नी आसीत्। अञ्जनाकेशरिणोः पुत्रः अस्माकं हनुमान्। यद्यपि केशरी हनुमतः क्षेत्रजपिता।

अञ्जनायाः अतुलनीयैः रूपगुणैः मुग्धः सन् वायुः तस्याः आलिङ्गनं कृतवान्। ततः अयं कपीश्रेष्ठः वायुपुत्रः इत्युच्यते। अस्य जन्मनः परम् अञ्जना फलेभ्यो वनं गतवती। परन्तु क्षुधार्तः आञ्जनेयः सूर्यं सुपक्वं फलमिति चिन्तितवान्। तस्य ग्रहणाय सः सूर्यं प्रति वायुवेगेन धावितवान्। शिशुः इति मत्वा दिवाकरः न तं दग्धवान्। परन्तु तस्मिन्नेव क्षणे सूर्यभक्षणोद्यतः राहुः सूर्यस्य रथे सन्निहितः आसीत्। आञ्जनेयः सूर्यं त्यक्त्वा तदा राहुम् आक्रमति स्म। भयार्तः राहुः इन्द्रस्य शरणापन्नो बभूव। ऐरावतारूढः इन्द्रः राहोः रक्षणाय हनुमत्समीपमागतवान्। परन्तु बालः आञ्जनेयः ऐरावतं फलमिति मत्वा तस्य ग्रसनाय चेष्टितवान्। तदा इन्द्रः क्रुद्धः सन् हनुमन्तं प्रति वज्रस्य प्रहारं कृतवान्। वज्राहतः सन् पवनपुत्रः धरायां सस्रंसे। वज्रेण अस्य वामा हनुः भग्ना जाता। तदा पवनः स्वपुत्रं क्रोडे संस्थाप्य गुहामेकां प्रविष्टवान्। स्वपुत्रस्य दशामिमं लक्षयित्वा शोकातुरः वायुः सर्वेषां प्राणिनां प्राणान् अवष्टम्भयति स्म। ततः पृथिव्यां सर्वे जीवाः मृताः बभूवुः। भीताः देवाः ब्रह्मणः समीपं सेधितवन्तः, सर्वं ज्ञापितवन्तश्च। देवैः सह प्रजापतिः वायुं प्रति गच्छति स्म, स्वहस्तेन च हनुमन्तं पुनर्जीवयति स्म। तदा वायुः सर्वेषु जीवेषु स्वगतिमप्रसारयत्। सर्वे देवाः आनन्दिताः हनुमते वरं दत्तवन्तः। इन्द्रः कपीन्द्राय वरं दत्तवान् यत् वज्रेण कदापि तस्य मृत्युर्न भविष्यतीति किञ्च वज्रेणास्य वामा हनुः भग्ना अतः अस्य नाम भवति हनुमान्निति। सूर्यः स्वकलानां शतं दत्तवन्तः। ततः एव सर्वशास्त्रविद् अभूदयम्। मृत्युः महादेवश्च अस्मै अमरत्वं दत्तवन्तौ। अनन्तरं यदा रामरावणयोः युद्धमारब्धं तदा रामचन्द्रस्य विजयस्य कारणमभवतदयम्

कपिश्रेष्ठः। स्वयं रामचन्द्रः उक्तवान् यत्-

एतस्य बाहुवीर्येण लङ्का सीता च लक्ष्मणः।
प्राप्ता मया जयश्चैव राज्यं मित्राणि बान्धवाः॥(उ.का.३५.९)

□□□□□□

## ॥ हनुमान्चालीसा इत्यस्य संस्कृतार्थः ॥

**श्रीविश्वरूपबेजः, स्नातकोत्तरद्वितीयवर्षीयः।**

**॥दोहा॥**

दिव्यगुरोः पादकमलस्य रजः स्पृष्ट्वा मम मनोदर्पणं स्वच्छं करोमि अपि च भगवतः रामस्य गुणकीर्तनं करोमि॥

हे पवनपुत्र हनुमन्! अविद्याग्रस्तोऽहमिति ज्ञात्वापि भवच्छरणं गच्छन्नस्मि। कृपया मह्यं शक्तिं बुद्धिं ज्ञानञ्च प्रयच्छन् मम रोगक्लेशादीन् निवारयतु॥

**॥चौपाई॥**

हे भगवन् हनुमन्! भवान् तु ज्ञानगुणयोः सागरः, जयतु।
यः स्वतेजोभिः त्रीन् लोकान् प्रकाशितवान् सः बानरश्रेष्ठनृपः भगवान् जयतु॥१॥
सः अंजनीदेव्याः पवनदेवस्य च पुत्रः भगवतः रामस्य प्रियदूतः अनंतशक्तेः स्वामी चास्ति॥२॥
भवान् तु महावीरः प्रतापशाली बलशालिदेहधारी चास्ति।
माम् विनाशात्मकविचारसङ्गात् सुविचारेषु नियोजयतु॥३॥
भवान् सुवर्णकान्त्या रञ्जितदेहयुक्तः रमणीयवस्त्रपरिहितः कुण्डलभूषितकर्णः चास्ति।
भवतः मनोहरकेशाः वायुना आन्दोलिताः भवन्ति॥४॥
भवतः हस्तौ वज्रशक्तिसम्पन्नगदया ध्वजया च विशोभितौ।
भवतः स्कंधः पवित्रमुंजतृणनिर्मितबन्धन्न सुसज्जितः अस्ति॥५॥
भवान् भगवच्छिवस्य अवताररूपः राज्ञः केसरिणः पुत्रः चास्ति।
भवतः प्रतापवशात् तेजस्वितायाः कारणाच्च भवान् सर्वत्र पूजितो भवति॥६॥

भवान् महद्विद्यायाः महच्चतुरतायाः महद्गुणानाञ्चाधिकारी।

भवान् सर्वदा महदुत्साहपूर्वकतया भगवतः श्रीरामस्य कार्यसम्पादनाय उत्सुकः तिष्ठति॥७॥

भवतः मनसि सर्वदा भगवतः श्रीरामस्य लक्ष्मणस्य तथा सीतादेव्याः स्मरणं चलति।

तस्मात् यदैव यत्र क्वापि प्रभोः भगवतः श्रीरामस्य कथा प्रचलति तदैव तत्र भवतः मनः रमते॥८॥

सूक्ष्मरूपं धृत्वा मात्रा सीतया सह साक्षात्कारं कृतवान्।

पुनः बृहद्रूपं धृत्वा लंकां भस्मीकृतवान्॥९॥

एकदा भयानकभीमरूपं धृत्वा राक्षससंहारं कृत्वा सहजतया भगवतः श्रीरामचन्द्रस्य कर्मणि सहायकः अभवत्॥१०॥

भवान् मरणासन्नं लक्ष्मणं जीवनप्रदानाय संजीवनीम् आनीतवान्।

तत्कारणात् श्रीरघुवीरः तथा श्रीरामचन्द्रः आनन्देन भवतः आलिंगनं कृतवान्॥११॥

भगवान् श्रीरामचन्द्रः भवतः भूयो भूयो प्रशंसनं कृत्वा स्वस्नेहभाग्भरतसमप्रियः भ्राता अस्ति भवान् इति उद्घोषितवान्॥१२॥

शेषनागः सर्वदा स्वस्य सहस्रमुखैः भवतः यशस्कीर्तनं करिष्यति।

लक्ष्मीदेव्याः पतिः भगवान् विष्णुः यः अवतारपुरुषः रामचन्द्रः सः भवन्तं आलिंगनं करिष्यति॥
१३॥

भगवान् ब्रह्मा नारदमुनिः सनकादिमुनयः देवी सरस्वती इतोपि अन्ये ऋषयश्च सादरेण भवतः गुणकीर्तनं करिष्यन्ति॥१४॥

भगवान् यमः, भगवान् कुबेरः विभिन्नदिक्पालाः च सादरेण भवतः गुणकीर्तनं करिष्यन्ति।

अपि च ये कवयः गायकाश्च तेऽपि भवतः महिमावर्णनं करिष्यन्ति॥१५॥

भवान् राज्ञा सुग्रीवेण सह भगवतः श्रीरामचन्द्रस्य साक्षात्कारं कारयित्वा सुग्रीवस्य एकमुपकारं कृतवान् येन सः स्वराज्यं पुनः प्राप्तवान्॥१६॥

रावणस्य भ्राता विभीषणः भवतः वाक्यस्य परिपालनं कृत्वा लंकायाः राजा अभवत् तद्रूपेणैव सः विभीषणः सर्वत्र प्रसिद्धोऽभूत्॥१७॥

पृथिव्याः बहुदूरस्थितं सूर्यमपि भवान् आकाशस्थितं किञ्चिन्मिष्टं फलमिति मत्त्वा अबाधेन तं गिलितवान्॥१८॥

भवान् मुखेन भगवतः श्रीरामचन्द्रस्य अंगुलीयकस्य भारं स्वीकृत्य सारल्येनैव समुद्रलंघनं कृत्वा लंकां प्रविष्टवान् इत्यत्र आश्चर्यस्य लेशः नास्ति॥१९॥

जगतीतले यावन्ति जटिलकार्याणि सन्ति तानि सर्वाणि भवदनुग्रहेण सरलतां प्राप्नुवन्ति॥२०॥

भवान् तस्य द्वारस्य संरक्षकः येन मार्गेण भगवन्तं श्रीरामचन्द्रं प्रति गच्छति।

भवतः अनुमतिं विना कोऽपि अनेन द्वारेण गन्तुं न पारयति॥२१॥

ये भवच्छरणं आगच्छन्ति ते सर्वे भवता संरक्षिताः सन्तः निर्भयेण सुखमनुभवन्तः जीवन्ति॥२२॥

केवलं भवानेव एकोस्ति यः तावतीमूर्जां नियंत्रयितुं शक्नोति यस्याः प्रतापेन लोकत्रयं भीत्या कम्पते॥२३॥

ये भवतः नामग्रहणं कुर्वन्ति तेषां समीपं दुष्टभूतप्रेतादयः गन्तुं न शक्नुवन्ति॥२४॥

ये भवतः वीरहनुमतः नामगुणं जपन्ति तेषां रोगाः कष्टानि च दूरीभवन्ति॥२५॥

ते सर्वदा सङ्कटात् रक्षिताः भवन्ति ये प्रतिक्षणं भगवतः हनुमतः मनसा कायिकेन वाचा च ध्यानं कुर्वन्ति॥२६॥

भगवान् श्रीरामचन्द्रः न केवलं सर्वेषां राज्ञां राजा अपि तु तपस्वीनामपि तपस्वी असीत् तस्य महापुरुषस्य सर्वस्यापि कार्यस्य ध्यानं भवान् कर्तुम पारयति तस्मादवश्यमेव हे भगवन् हनुमन् भवान् श्रेष्ठः॥२७॥

यः कोऽपि भवतः समीपे स्वमनोरथं प्रकटयति सः स्वजीवने तत्सर्वं तथा अनंतफलं प्राप्नुवन्ति॥२८॥

भवतः महिमा प्रसिद्धिः यशश्च युगचतुष्टयेषु समग्रे जगति च ऊर्जारूपेण व्याप्तोस्ति॥२९॥

भवान् सज्जनानां तपस्वीनाञ्च रक्षकः राक्षसानामसुराणाञ्च नाशकः भगवतः श्रीरामचन्द्रस्य परमप्रियः च अस्ति॥३०॥

मातुः जानक्याः आशीर्वादेन भवान् अलौकिकशक्तीनां तथा अणुत्वमहत्वाद्यष्टसिद्धीनामधिकारी नवप्रकारेण विभक्तस्य सम्पत्तेः प्रदाता च अस्ति॥३१॥

भगवन्तं श्रीरामचन्द्रं प्रति भक्तिरहस्यं भवतः पार्श्वे एवास्ति यतो हि भवान् एव सर्वदा तस्य सेवाकार्ये नियुक्तः तिष्ठति॥३२॥

भवतः कृता यानि प्रशंसावाक्यानि उच्यन्ते तानि सर्वाणि भगवन्तं श्रीरामचन्द्रं प्रति हर्षप्रदायकं भवन्ति। तत्प्रसादेन प्रशंसाकर्तॄणां बहुजन्मकृतपापनाशः सम्भवति॥३३॥

ये भवन्तमुद्दिश्य प्रशंसावाक्यं गानं वा कुर्वन्ति ते स्वजीवनस्य अन्तिमे भगवतः श्रीरामचन्द्रस्य निवासे शरणं प्राप्नुवन्ति।

तत्र जन्मलब्धवन्तं प्राणिनं भगवद्भक्तरूपेण जानन्ति सर्वे॥३४॥

यदि केषामपि अन्यदेवानां पूजां न करोति।

अपि च केवलं भगवतः हनुमत एव सेवां करोति सोऽपि सर्वसुखं प्राप्नोति॥३५॥

बलवतः हनुमतः निरन्तरध्यानेन सर्वेषाम् आपदानां दुःखानां च नाशः भवति॥३६॥

हे भगवन् हनुमन् भवान् जयतु।कृपया गुरुदेववन्मदुपरि दयां करोतु॥३७॥

यः कोऽपि भवतः प्रार्थनां शतबारं पठिष्यति सः सर्वबंधनात् विमुच्य महासुखेन जीवति॥३८॥

यः कोऽपि हनुमान्चालीसां पठिष्यति तस्य सिद्धिप्राप्तिः भविष्यति।

गौरीदेव्याः पतिः भगवान् शिवः तस्योपरि कृपावान् भविष्यति॥३९॥

सदैव रामभक्तः तुलसीदासः निवेदनं करोति यत् भवान् तस्य हृदये निवसतु॥४०॥

**॥दोहा॥**

हे भगवन् हनुमन्, पवनपुत्र, आपद्धर्तः, अत्यन्तशुभदिव्यरूपवन् भगवता श्रीरामचन्द्रेण लक्ष्मणेन मात्रा सीतया च सह कृपया मम हृदि निवस॥

## ॥ हनुमतोक्तानि चितानि सुभाषितानि ॥

**श्रीराहुलमाइतिः, स्नातकोत्तरद्वितीयवर्षीयः।**

शान्तिं सुखं च इच्छन्ति मानवाः। आध्यात्मिकता हि शाश्वतिकी शान्तिः समृद्धिश्च। सा च सदाचारमूला धर्मकामाद्याश्रिता। आचारो परमो धर्मः इति खलु आर्षवचनम्। अत एव आचारप्रवणाः एव शिष्टशब्देन अभिहिताः। ते शिष्टाः महन्तः एव लोकं समुद्धर्तुं भूयः प्रसादयन्ति। तदाचार-संरक्षणोपायविधासु अन्यतमा सुभाषितपरम्परा। सुभाषितानि तदेकवृत्त्या काव्यादिषु आनुषङ्गिकवृत्त्या च

लोकहिताय सद्भिः उपदिष्टानि। इत्थमेव शतशः सुभाषितवचनानि निगदितानि आदिकविना वाल्मीकिना। तत्र वाल्मीकिरामायणे सुन्दरकाण्डे हनुमता उक्तानि कानिचन् सुभाषितानि अत्र वर्ण्यन्ते।

धन्याः खलु महात्मानो मुनयः सत्यसंम्मताः।
जितात्मानौ महाभागाः येषाः न स्तः प्रियाप्रिये॥(सुन्दरकाण्डे-२६.४५)

अस्मिन् श्लोके कपिवरः के तावत् धन्याः इति कथयति। अस्मिन् जगति बहवः प्राणिनः प्रतिनियतम् आविर्भवन्ति तिरोहन्ति च। तेषु केचन एव तथाविधं कार्यं सम्पाद्य स्वजीवनम् अविस्मरणीयं कुर्वन्ति। ते एव वस्तुतः धन्याः। तदेव आह कपिवरः ब्रह्मसंमतमात्मत्वेन येषां ते सत्यसंमताः संसारसागरं तर्तुं समर्थाः जितान्तःकरणः जितात्मानः पूर्वजन्माद्यर्जितनिष्कामधर्मरूपमहाभाग्यवन्तः ध्यानशीलाः मननशीलाश्च ये मुनयः ते एव धन्याः। तेषां धन्यत्वे हेतुः कः इति चेदुच्यते - येषां कर्मजन्ये प्रियाप्रिये न स्तः। अर्थात् महात्मानः इदं मम प्रियकार्यमिदञ्चाप्रियं कार्यमिति पक्षपातं नाचरन्ति। स्वकर्मसु निरताः सन्तः स्वधर्ममाचरन्ति। कर्मणि आसक्तिश्चेदेव फललाभे औत्सुकता उत्पद्यते, फले च लब्धे लोभः जायते। लोभाच्च विनाशः। अत एव कर्मण्यनासक्ताः सन्तः मानवाः धन्याः भवन्ति।

प्रियान्न संभवेद्दुःखमप्रियादधिकं भवेत्।
ताभ्यां हि ते वियुज्यन्ते नमस्तेषां महात्मनाम्॥(सुन्दरकाण्डे-२६.४६)

के तावत् धन्याः इति प्रश्ने उत्तरमाह - येषां प्रियाप्रिये न स्तः इति। अस्मिन् श्लोके प्रियाप्रियाभावं विवृणोति।

अस्मिल्लोके साधारणमानवाः प्रियवस्तुनः वियोगे अप्रियवस्तुनः संयोगे च महद्दुःखमनुभवन्ति। अतः इष्टप्राप्त्यै अनिष्टपरिहाराय सततं प्रवर्तन्ते जनाः। परन्तु अन्ततो गत्वा इष्टवस्तुनः वियोगे दुःखमेवानुभवन्ति। एतत्सर्वं परिशील्य प्रियाप्रियविषये नैव चिन्तयन्ति। येषां मुक्तानां महात्मानां प्रियाद्वियुज्यमानाद्दुःखं न संभवेत् अप्रियात्संयुज्यमानादधिकं दुःखं च न भवेत् ते एव कृतकाराः। प्रियवियोगजदुःखाप्रियसंयोगजदुःखाभ्यां ये वियुज्यन्ते ते धन्याः तेभ्यः मामिका नमस्क्रिया अस्तु। तेषां नमस्कारेण ममापि तत्तुल्यता स्यादिति आशयः।

कार्ये कर्मणि निवृत्ते यो बहुन्यपि साधयेत्।
पूर्वकार्याविरोधेन स कार्यं कर्तुमर्हति॥(सुन्दरकाण्डे-४१.५)

अस्मिन् श्लोके कः कार्यं कर्तुमर्हति इति विषये आलोच्यते। आदिष्टातिरिक्तकार्याणि फलदायकानि न वेति विषयः अत्र विचार्यते।

स्वामिना आदिष्टं कार्यमादौ कर्तव्यम्। स एव भृत्यस्य धर्मः। स्वामिसंदिष्टकार्यातिरिक्तकार्येकरणेन हि दोषः। परन्तु तदेव अतिरिक्तकार्यं यदि स्वामिनः उपकाराय भवेत्तर्हि तदवश्यं साधनीयम्। इदमपि अवधेयं यत् सति प्रधानकार्ये निवृत्तौ एव अतिरिक्तकार्याणि कर्तव्यानि। सः एव अतिरिक्तकार्यसाधने समर्थः यः आदौ स्वामिसंदिष्टकार्यं निर्विघ्नेन समापयेत्। अस्य श्लोकस्याशयस्तावत्-स्वाम्याज्ञाप्तकर्तव्ये सिद्धे सति यो बहुनि कृतकार्योपायतया विपुलकार्याणि साधयितुमिच्छेत् सःसाधितकार्यप्रातिकूल्यराहित्येन कार्यं कर्तुमर्हति।

नह्येकः साधको हेतुः स्वल्पस्यापीह कर्मणः।

यो ह्यर्थं बहुधा वेद स समर्थोऽर्थसाधने॥(सुन्दरकाण्डे-४१.६)

कस्मिन्श्चित् कर्मणि कर्तव्ये तत्कर्मणः मुख्यहेतुज्ञानमात्रेणैव कार्यं न सिद्ध्यति अपि तु तदानुषङ्गिकतया प्रधानहेत्वन्तरानामपि ज्ञानमपि अपेक्षितं भवति। यतो हि स्वल्पस्यापि कर्मणः न हि एकः एव साधकः हेतुर्भवति। तद्यथा घटनिर्माणे मृत्तिकामात्रस्य न हेतुत्वम्।

उपादानकारणत्वेन घटनिर्माणे मृत्तिकायाः एव मुख्यत्वे अपि नान्तरीयकतया कुललादीनामपि अपेक्षा वर्तते। अत एव अन्तिमपादे उक्तं - यः बहुधा हेतुन् वेद स एव अर्थसाधने समर्थः । संक्षेपेण अस्यायमाशयः- कार्यं साधनीयं चेत् कार्योपकरणानां सर्वेषामेव ज्ञानमपेक्षितं मुख्यहेतोः ज्ञानमात्रेण न कार्यसिद्धिः।

धन्याः खलु महात्मानः ये बुद्ध्या कोपमुत्थितम्।

निरून्धन्ति महात्मानो दीप्तमग्निमिवाम्भसा॥(सुन्दरकाण्डे-५५.३)

सम्मोहनादिदोषाणां जनने हेतुः क्रोधः। वस्तुतः मानवानां दुःखस्य प्रधानं कारणमेव क्रोधः। न शक्नुवन्ति सर्वे क्रोधं सहर्तुम्। ते खलु धन्याः ये स्वबुद्ध्या स्वेच्छया उत्थिमपि कोपं प्रशमयितुमर्हन्ति। अग्निं समयितुं यथा जलमेव क्षमं भवति तद्वत् क्रोधं नाशयितुं शान्तमनस्काः धीराः महात्मानः एव शक्नुवन्ति। अर्थात् जीवनेऽस्मिन् सुखं प्राप्तव्यं चेत् क्रोधः संवरणीयः।